## श्रीमदनन्तार्यकुमार रामानुजार्यपुत्र नारायणार्य प्रणीता
## ॥ श्रीमदनन्तार्य विषया अष्टश्लोकी ॥

वन्देऽनन्तगुरूत्तंस वंशमुक्ताफलात्मनः ।
रामानुजार्यस्य सुतं श्रीनारायणदेशिकम् ॥

श्रीरामानुजवरजे मुनौ शठरिपोर्गाथा विशेषार्थदे
शिष्यान् प्रेक्ष्य भवत्सु वेङ्कटपतेःकःकिङ्करस्स्या दिति ।
प्रश्नं कुर्वति तेषु मौनिषुच यो बद्धाञ्जलिः प्रार्थयन्
प्राप श्रीनिधिकिङ्करत्वमनघं तं शेष सूरिं भजे ॥ 1

श्रीरङ्गाद्वृषभाचलं प्रचलितेश्चार्येषु भोज्यार्थिषु
श्रान्तेष्वध्वनि वेङ्कटाचलपतिः चित्रान्न पात्रं वहन् ।
पृष्टस्तैरिति को भवान् कुत इदं यःशिष्यभावं वदन्
पद्येयद्विषये बभाण फणिराट् सूर्युत्तमं तं भजे ॥ 2

स्नातुं स्वामि सरोवरं प्रति चलन् शेषार्यवर्यःपथि
व्याघ्रे चेल दशाञ्चल स्पृशि ततः शिष्येषुमुक्त्यर्थिषु ।
भूयादेवमितिब्रुवन् पुनरपि स्नात्वैत्य पश्यन् मृतं
दीप्तं वेङ्कटनायकाङ्घ्रिकमले हृष्टोऽस्तुनः श्रेयसे ॥ 3

तिष्ठन् शेषगुरो ममिवहिगुरौ मुक्तिं परैदुर्लभां
व्याघ्रादेश्च ददाति चेदपि भवान् किंमेऽत्र यास्याम्यहम् ।
इत्युक्तश्च वृषाद्रि राजपतिनाऽनन्तार्य चूडामणिः
मत्तः श्रैष्ठ्यमिदं तवात्र न परं सप्ताह इत्यब्रवीत् ॥ 4

यास्यन् केरलसंज्ञकं जनपदं पाथेय बन्धं पथि
स्नात्वाऽऽराध्य जगद्गुरुं तदनु यो भोक्तुं विविच्यादरात् ।
धृष्ट्वा तत्रपिपीलिका इति मया नान्यत्र नेया इमाः
शेषाद्रिं पुनरेत्य ताश्चमुमुशे नन्तास्म्यनन्तं गुरुम् ॥ 5

श्रीमच्चंपक जाति कुन्दकुटजा ध्युत्फुल्ल पुष्पाकरे
यस्योद्यानवरे परस्स भगवान् श्रीवेङ्कटेशो निशि ।
त्यक्त्वानन्दविमानमन्वहमहो लक्ष्म्यासहारंस्त हा
तस्मै शेषगुरूत्तमाय सततं कुर्याम् नमस्सन्ततिम् ॥ 6

श्रीमद्वेङ्कटनायक प्रियतमा वात्सल्य सीमा रमा
निश्युद्यान लतान्त केलिसमये ग्रस्तातिं भीतेव सा ।
सप्रेमस्मितमाह मुग्धमधुरं भोस्तात तातेति यं
तं वन्दे गुरुमौलि शेखरमहं शेषार्यवर्यं सदा ॥ 7

कन्याकक्षकरात्त पुष्पपिटकं काल्यागतं श्रीनिधिः
मह्यं देहि तवात्मजामिति भृशं यं प्रार्थ्यलेभे नतः ।
कन्याशुल्कमितीव सस्पृहतरं प्रोद्धृत्य कण्टान्निजात्
मालां यस्य गलेऽर्पयन् तमनिशं शेषार्यवर्यं श्रये ॥ 8

श्रीमद्रामानुजाचार्य पुत्र नारायणोदितम् ।
कलयन्तु सदा सन्तोऽनन्तार्याष्टक मादरात् ॥

**॥ श्रीमदनन्तार्य अष्टश्लोकी संपूर्णम् ॥**

---